# प्रार्थनापत्रं

**प्रश्न 1. स्वं योगेशं राजकीय-उच्च-माध्यमिक-विद्यालयस्य रामपुरस्य प्रधानाचार्याय अस्वस्थताकारणात् त्रिदिवसस्य अवकाशार्थं संस्कृते प्रार्थनापत्रं लिखत।**

**उत्तरम्–**

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः,

राजकीय-उच्च-माध्यमिक-विद्यालयः,

रामपुरम्।

विषयः-दिनत्रयस्य अवकाशाय प्रार्थनां-पत्रम्।

महोदयः!

सविनयं निवेदनमस्ति यदहं विगतदिवसात् ज्वरपीड़ितोऽस्मि। अतः अस्वस्थता कारणादहं विद्यालये आगन्तुं न शक्नोमि।

अतः प्रार्थना अस्ति यत् दि. 15-02-20xx तः 17-02-20xx पर्यन्तं दिनत्रयस्य अवकाशं स्वीकृत्य मामनुग्रहीष्यन्ति श्रीमन्तः।।

भवदाज्ञाकारी शिष्यः

दिनांकाः 15-02-20xx ई.
योगेश:

कक्षा-दशमी

**प्रश्न 2. भवान् राजकीय-आदर्श-उच्च-माध्यमिक-विद्यालय-कंचनपुरस्य दशम्याः कक्षायाः छात्रः राकेशः आस्त। भवतः पिता अतीवः निर्धनः अस्ति। स्वस्यप्रधानाचार्याय शल्कमुक्त्यर्थम् एकं प्रार्थनापत्रं लिखतु।**

**उत्तर-**

सेवायाम्,

श्रीमन्तः प्रधानाचार्यः महोदया,

राजकीय आदर्श-उच्च-माध्यमिक-विद्यालयः,

कंचनपुरम्।

विषयः-शुल्कमुक्त्यर्थं प्रार्थना-पत्रम्।

महोदयाः,

निवेदनमस्ति यदहं भवतां विद्यालये दशम्यां कक्षायां पठामि। मम पिता अतीव निर्धनः, अतः मम परिवारस्य आर्थिकदशा समीचीना नास्ति। निर्धनताकारणात् मम पिता मदीयं विद्यालयशल्कप्रदानार्थं सक्षमो नास्ति. किन्त मम अध्ययनस्य रुचिः वर्तते । अत एव प्रार्थना वर्तते यन्मम निर्धनतां स्वाध्ययने च रुचिं विलोक्य शिक्षणशुल्कात् सर्वथामुक्तिं प्रदास्यन्ति श्रीमन्तः।

भवदाज्ञाकारी शिष्यः

दिनांक: 15-03-20XX ई.

राकेशः

कक्षा-दशमी (अ)

**प्रश्न 3. भवान् राजकीय-आदर्श-उच्चमाध्यमिक-विद्यालय कञ्चनपुरस्य दशम्याः कक्षायाः छात्रः सोमनाथः अस्ति। स्वविद्यालयस्य प्रधानाचार्य आवश्यक कार्यवशात् पञ्चदिनस्य अवकाशार्थं प्रार्थनापत्रं लिखत।**

**उत्तरम्–**

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदया:

राजकीय-आदर्श-उच्चमाध्यमिक विद्यालयः,

कञ्चनपुरम्।

विषयः-पञ्चदिनस्य अवकाशार्थं प्रार्थना-पत्रम्

महोदया:!

उपर्यक्त विषयान्तर्गते निवेदनम् आस्त यत् मम गृहे अत्यावश्यकं कार्यं वर्तते। अतः अहं विद्यालयम् आगन्तुं समर्थः नास्मि।

प्रार्थना अस्ति यत् 16-3-20XX तः 20-3-2022 दिनाङ्कपर्यन्तं पञ्चदिनस्य अवकाशं स्वीकृत्य माम् अनुग्रहीष्यन्ति। '

भवताम् आज्ञाकारी शिष्यः

दिनाङ्काः 5-10-20xx
सोमनाथः

कक्षा-दशमी

**प्रश्न 4.स्वं रमेशचन्द्रं मत्वा राजकीय-उच्च-माध्यमिक-विद्यालयस्य भरतपुरस्य प्रधानाचार्याय स्थानान्तरण**

**प्रमाणपत्रप्राप्त्यर्थम् संस्कृत प्रार्थनापत्रमेकं लिखतु।**

**उत्तरम्---**

सेवायाम्,

श्रीमन्तः प्रधानाध्यापकमहोदयाः,

राजकीय-उच्च-माध्यमिकविद्यालयः,

भरतपुरम्।

विषयः-स्थानान्तरण-प्रमाण-पत्र-प्राप्त्यर्थम्।

महोदयाः,

निवेदनमस्ति यद् मम पूज्यपितुः स्थानान्तरणं बीकानेरनगरे सञ्जातम्। अस्मात्कारणात् वयं सर्वेऽपि परिवारिकजनाः तत्रैव गमिष्यावः।ममापि तैः सह तत्र गमनं निश्चितमेव। अतः सम्प्रति अहमत्र पठितुं सर्वथा असंर्थोऽस्मि

अतः प्रार्थना अस्ति यन्महयं स्थानान्तरणं प्रमाणपत्रं प्रदाय अनुग्रहीष्यन्ति

श्रीमन्तः। ममः पितुः स्थानान्तरणस्य राज्यादेशप्रतिलिपिः भवतामवलोकनार्थं संलामा अस्ति ।

प्रार्थी,

दिनांकाः 25 फरवरी, 20xx ई.
रमेशचन्द्रः

कक्षा-10 (ब)

**प्रश्न 5. स्वं योगेशकुमारः मत्वा राजकीय उच्च माध्यमिक विद्यालयस्य अजयमेरुनगरस्य प्रधानाचार्याय**

**चरित्रप्रमाणपत्रप्राप्त्यर्थं संस्कृते प्रार्थनापत्रमेकं लिखत ।**

**उत्तरम्-**

सेवायाम्,

श्रीमन्तः प्रधानाध्यापकमहोदयाः,

राजकीय-उच्च-माध्यमिकविद्यालयः,

अजयमेरुनगरम्।

विषयः-चरित्र-प्रमाण-पत्र-प्राप्त्यर्थम्।

महोदयात!

नम्रनिवेदनमस्ति यद् अहं भवतां विद्यालये दशम्यां कक्षायां पठामि। अहं स्वकीयं चरित्र-प्रमाण-पत्रं वांछामि। यतो हि प्रतियोगितापरीक्षायां तस्य आवश्यकता वर्तते।

अतः प्रार्थना अस्ति यन्मां चरित्र-प्रमाण-पत्रं प्रदाय अनुग्रहीष्यन्ति श्रीमन्तः।

प्रार्थी,

दि. 10-01-20xx ई
योगेशकुमारः

कक्षा-10 (अ)

**प्रश्न 6. स्वं'अभ्युत्कर्षः' मत्वा राजकीय-उच्च माध्यमिक-विद्यालयस्य उदयपुरस्य प्रधानाचार्यमहोदयाय विद्यालये क्रीडाव्यवस्थार्थं संस्कृते प्रार्थनापत्रं लिखतु।**

**उत्तरम्—**

सेवायाम्,

श्रीमन्तः प्रधानाचार्य महोदयः,

राज. उच्च-माध्यमिक-विद्यालयः,

उदयपुरम्।

महोदय: !

सविनयं निवेद्यते यदस्माकं विद्यालये क्रीडायाः समुचिता व्यवस्था नास्ति। शारीरिकविकासाय क्रीडनमपि आवश्यकं भवति। अध्यनेन सममेव क्रीडनमपि अस्मभ्यं रोचते। अतः विद्यालये क्रीडायाः सम्यक् व्यवस्थां विधाय अनुगृह्णन्तु श्रीमत्यः।

भवताम् आज्ञानुवर्ती

दिनांकः 10-02-20xx .
अभ्युत्कर्षः

कक्षा-दशमी

**प्रश्न 7 .स्वंगोविन्दं मत्वा राजकीय-उच्च-माध्यमिक-विद्यालय जोधपुरस्य प्रधानाचार्याय अस्वस्थताकारणात्**

**पञ्चदिवसस्य अवकाशार्थं संस्कृते प्रार्थनापत्रं लिखतु।**

**उत्तरम्-**

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः;

राजकीय-उच्च-माध्यमिक विद्यालयः,

जोधपुरम्।

विषयः-पञ्चदिनस्य अवकाशाय प्रार्थना-पत्रम्।

महोदयः!

सविनयं निवेदनमस्ति यदहं विगतदिवसात् ज्वरपीड़ितोऽस्मि। अत: अस्वस्थता कारणादहं विद्यालये आगन्तुं न शक्नोमि।।

अंतः प्रार्थना अस्ति यत् दि. 15-02-20xx तः 19-02-20xx पर्यन्तं पञ्चदिनस्य अवकाशं स्वीकृत्य मामनुग्रहीष्यन्ति श्रीमन्तः।

भवताम् आज्ञपालकः

दिनांकाः 15-02-20xx ई.

गोविन्दः

कक्षा-दशमी

**प्रश्न 21. भवान् दशम्याः कक्षायाः छात्रः महेन्द्रः अस्ति। स्वविद्यालयस्य प्रधानाचार्याय दिनद्वयस्य रुग्णावकाशार्थ प्रार्थनापत्रं लिखतु।**

**उत्तरम्–**

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः

राजकीयः आदर्श-उच्चमाध्यमिक विद्यालयः

जयपुरम् (राज.)

विषयः-दिनद्वयस्य रुग्णावकाशार्थं प्रार्थनापत्रम्।

महोदयाः!

उपर्युक्तविषयान्तर्गते निवेदनम् अस्ति यत् अहं गतदिवसात् अतीव रुग्णोऽस्मि। अतः अहं विद्यालयम् आगन्तुं समर्थः नास्मि।

प्रार्थना अस्ति यत् 13.3.20xx .तः 14.3.20xx दिनाङ्कपर्यन्तं दिनद्वयस्य - अवकाशं स्वीकृत्य माम् अनुग्रहीष्यन्ति।

भवताम् आज्ञाकारी शिष्यः

दिनाङ्काः 13.03.20xx

महेन्द्रः

कक्षा-दशमी